॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय १४

सर्वे ते त्वरितं गत्वा किष्किन्धां वालिपालिताम् ।
वृक्षैरात्मानमावृत्य व्यतिष्ठन्गहने वने ॥ १॥

विचार्य सर्वतो दृष्टिं कानने काननप्रियः ।
सुग्रीवो विपुलग्रीवः क्रोधमाहारयद्भृशम् ॥ २॥

ततः स निनदं घोरं कृत्वा युद्धाय चाह्वयत् ।
परिवारैः परिवृतो नादैर्भिन्दन्निवाम्बरम् ॥ ३॥

अथ बालार्कसदृशो दृप्तसिंहगतिस्तदा ।
दृष्ट्वा रामं क्रियादक्षं सुग्रीवो वाक्यमब्रवीत् ॥ ४॥

हरिवागुरया व्याप्तं तप्तकाञ्चनतोरणाम् ।
प्राप्ताः स्म ध्वजयन्त्राढ्यां किष्किन्धां वालिनः पुरीम् ॥ ५॥

प्रतिज्ञा या त्वया वीर कृता वालिवधे पुरा ।
सफलां तां कुरु क्षिप्रं लतां काल इवागतः ॥ ६॥

एवमुक्तस्तु धर्मात्मा सुग्रीवेण स राघवः ।
तमथोवाच सुग्रीवं वचनं शत्रुसूदनः ॥ ७॥

कृताभिज्ञान चिह्नस्त्वमनया गजसाह्वया ।
विपरीत इवाकाशे सूर्यो नक्षत्र मालया ॥ ८॥

अद्य वालिसमुत्थं ते भयं वैरं च वानर ।
एकेनाहं प्रमोक्ष्यामि बाणमोक्षेण संयुगे ॥ ९॥

मम दर्शय सुग्रीववैरिणं भ्रातृरूपिणम् ।
वाली विनिहतो यावद्वने पांसुषु वेष्टते ॥ १०॥

यदि दृष्टिपथं प्राप्तो जीवन्स विनिवर्तते ।
ततो दोषेण मा गच्छेत्सद्यो गर्हेच्च मा भवान् ॥ ११॥

प्रत्यक्षं सप्त ते साला मया बाणेन दारिताः ।
ततो वेत्सि बलेनाद्य बालिनं निहतं मया ॥ १२॥

अनृतं नोक्तपूर्वं मे वीर कृच्छ्रेऽपि तिष्ठता ।
धर्मलोभपरीतेन न च वक्ष्ये कथं चन ॥ १३॥

सफलां च करिष्यामि प्रतिज्ञां जहि सम्भ्रमम् ।
प्रसूतं कलमं क्षेत्रे वर्षेणेव शतक्रतुः ॥ १४॥

तदाह्वाननिमित्तं त्वं वालिनो हेममालिनः ।
सुग्रीव कुरु तं शब्दं निष्पतेद्येन वानरः ॥ १५॥

जितकाशी जयश्लाघी त्वया चाधर्षितः पुरात् ।
निष्पतिष्यत्यसङ्गेन वाली स प्रियसंयुगः ॥ १६॥

रिपूणां धर्षणं शूरा मर्षयन्ति न संयुगे ।
जानन्तस्तु स्वकं वीर्यं स्त्रीसमक्षं विशेषतः ॥ १७॥

स तु रामवचः श्रुत्वा सुग्रीवो हेमपिङ्गलः ।
ननर्द क्रूरनादेन विनिर्भिन्दन्निवाम्बरम् ॥ १८॥

तस्य शब्देन वित्रस्ता गावो यान्ति हतप्रभाः ।
राजदोषपरामृष्टाः कुलस्त्रिय इवाकुलाः ॥ १९॥

द्रवन्ति च मृगाः शीघ्रं भग्ना इव रणे हयाः ।
पतन्ति च खगा भूमौ क्षीणपुण्या इव ग्रहाः ॥ २०॥

ततः स जीमूतगणप्रणादो
नादं व्यमुञ्चत्त्वरया प्रतीतः ।
सूर्यात्मजः शौर्यविवृद्धतेजाः
सरित्पतिर्वानिलचञ्चलोर्मिः ॥ २१॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made

publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com